**CLASS : 12th (Sr. Secondary)** **Code No. 3605**

**Series : SS-M/2018**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

## (अपठित-अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

सत्सङ्गतिः धियः जाड्यं हरति। वाचि सत्यं सिञ्चति। मानोन्नतिं करोति। पापम् अपाकरोति। मनः प्रसादयति। सर्वत्र यशः तनोति। कथय, मनुष्याणां कृते सत्सङ्गतिः किं न करोति, अर्थात् सर्वेषामेव उत्तमगुणानां विकासं करोति। ईदृशः अस्ति सत्सङ्गतेः महिमा। अयम् एकः स्वाभाविकः अभिप्रायोऽस्ति यत् मनुष्यस्य सङ्गतिः यादृक्प्रवृत्तिधारकेण सह भवति, सः तादृशः एव भवति। यदि तस्य उत्थानम् उपवेशनं दुष्टैः सह, तदा सोऽपि भविष्यति। परं सज्जनैः साकं संसर्गात् स एव जनः सुजनः भवितुं शक्नोति। प्रभावस्तु अवश्यमेव पतति अन्योऽन्ययोः, एतत् तु स्वीकरणीयमेव जायिष्यते। यदा वयं सङ्गतेः प्रभावं जड़पदार्थेषु पश्यामः, तदा चेतनः प्राणी कथं नु प्रभवितुं क्षमते।

***प्रश्नाः*** – $2 \times 5 = 10$

(क) सत्सङ्गतिः धियः किं हरति ?

(ख) सत्सङ्गतिः केषां विकासं करोति ?

(ग) सज्जनैः सङ्गतिं जनः कीदृशः भवितुं शक्नोति ?

(घ) सङ्गतेः प्रभावः वयं कं पदार्थेषु पश्यामः ?

(ङ) 'भवितुम्' अत्र कः प्रत्ययः ?

### खण्डः 'ख'

## (रचनात्मक-कार्यम्)

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) समयस्य सदुपयोगः,

(ख) मम विद्यालयः,

(ग) अनुशासनम्।

## खण्डः 'ग'

## (पठित–अवबोधनम्)

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमवबुध्यते। पश्यत एव नश्यति। सरस्वतीपरिगृहीतं नालिङ्गति जनम्। गुणवन्तं न स्पृशति। सुजनं न पश्यति।

**अथवा**

(ख) तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति, तावत् त्वरितमनेन तरुगहनेनापसर्पत।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः।।

**अथवा**

(ख) न कर्मणामनारम्भान्नैष्कर्म्यम् पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) त्वया निर्मितोऽयं क्षुद्रोऽनाथाश्रमोऽधुना महाद्रुमेण परिणतः।

(ख) स्वर्गभूमिं कुर्शीति वदन्ति।

(ग) मम वीरदर्पस्य शौर्यस्य च प्रज्ज्वलितं ज्योतिस्तत्रैव निर्वाणमभूत्।

(घ) निष्क्रष्टुमर्थं चकमे कुबेरात्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तानानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

मनुष्याणां हिंसावृत्तिस्तु निरवधिः। पशुहत्या तु तेषाम् आक्रीडनम्। केवलं विक्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति।

*प्रश्नाः* - $2 \times 1 = 2$

(क) हिंसावृत्तिः कीदृशी ?

(ख) तेषाम् आक्रीडनं का ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्।।

*प्रश्नाः* - $2 \times 1 = 2$

(क) महात्मनाम् प्रकृतिसिद्धं किं भवति ?

(ख) 'यशसि' इति पदे का विभक्तिः कः शब्दश्च ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) अश्वमेध इति नाम <u>क्षत्रियाणां</u> महान् उत्कर्षनिकषः।

(ख) बुद्धियुक्तो जहातीह <u>उभे</u> सुकृतदुष्कृते।

## खण्डः 'घ'

## (संस्कृत-साहित्य-परिचयः)

**9.** महाकवेः कालिदासस्य ***अथवा*** श्रीनारायणदाशस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 4

(i) समुद्रसङ्गमः,

(ii) ईशावास्योपनिषत्।

## खण्डः 'ङ'

## (छन्दोऽलङ्कार-परिचयः)

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – $2 \times 4 = 8$

(i) इन्द्रवज्रा,

(ii) शिखरिणी,

(iii) अनुष्टुप्।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – $2 \times 4 = 8$

(i) अन्योक्तिः,

(ii) यमकः,

(iii) श्लेषः।

## खण्डः 'च'

## (अनुप्रयुक्त-व्याकरणम्)

**13.** (क) वृद्धिसन्धेः ***अथवा*** सत्वसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्त्ताकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) द्विगुसमासस्य ***अथवा*** अव्ययीभावसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः 'छ'

## [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'आहुरविद्यया' इति पदे कः सन्धिविच्छेदः ?

(i) आहुर + अविद्यया (ii) आहुरा + विद्यया

(iii) आहुः + अविद्यया (iv) आहुः + रविद्यया

(ख) 'जनयेत् + अज्ञानाम्' इति पदे किं सन्धिपदम् ?

(i) जनयेज्ञानाम् (ii) जनयेतज्ञानम्

(iii) जनयेदज्ञानाम् (iv) जनयैज्ञानाम्

(ग) 'मुनिर्याति' इति पदे कः सन्धिः ?

(i) अयादिसन्धिः (ii) यणसन्धिः

(iii) विसर्गसन्धिः (iv) प्रकृतिभावसन्धिः

(घ) 'ग्रामगतः' इति पदे विग्रहोऽस्ति –

(i) ग्रामः गतः (ii) ग्रामं गतः

(iii) ग्रामाय गतः (iv) ग्रामाः गतः

(ङ) 'सप्तदिनम्' इति पदे कः समासः ?

(i) अव्ययीभावः (ii) बहुव्रीहिः

(iii) कर्मधारयः (iv) द्विगुः

(च) 'पुण्यः च असौ अनुभावः' इति विग्रहे किं समस्तपदम् ?

(i) पुण्यानुभावः (ii) पुण्यश्चपुण्यः

(iii) पुण्यश्चभावः (iv) पुण्यभावः

(छ) 'छात्र' तृतीया विभक्तौ एकवचने रूपम् –

(i) छात्रम् (ii) छात्रान्

(iii) छात्रैः (iv) छात्रेण

(ज) 'विद्वांसः' इति पदे का विभक्तिः ?

(i) तृतीया (ii) चतुर्थी

(iii) प्रथमा (iv) सप्तमी

(झ) 'योजते' इति पदे कः धातुः ?

(i) योज् (ii) युज्

(iii) यौज (iv) यूज्

(ञ) 'विलोक्यसे' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) अन्यपुरुषः

(iii) उत्तमपुरुषः (iv) मध्यमपुरुषः

(ट) 'अत्तुम्' इति पदे कः प्रत्ययः ?

(i) तुमुन् (ii) क्त्वा

(iii) मतुप् (iv) अनीयर्

(ठ) 'आ + हृ + तुमुन्' एषां संयोगे किं रूपम् ?

(i) आहृत (ii) आहरत्य

(iii) आहर्तुम् (iv) आहरितुम्

(ड) 'परितः' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(ढ) 'विद्वान्' इति पदस्य समानार्थकपदमस्ति –

(i) विश्वस्तः (ii) मूर्खः

(iii) मार्जारः (iv) मनीषी

(ण) 'अतिगहनम्' इति पदस्य विशेष्यम् –

(i) अन्धकारः (ii) यौवनप्रभवम्

(iii) दिवसः (iv) प्रकाशः

(त) 'मृत्युम्' इति पदस्य विलोमपदमस्ति –

(i) मरणम् (ii) प्रकाशम्

(iii) अमृतम् (iv) वर्षणम्